तथा । नागोदये च उद्दृष्टो हतो विद्धो विदारितः । कालदष्टं विजानीयात् कश्यपस्य वचो यथा । यन्मात्रः पतते बिन्दुर्वालाग्रसलिलोद्धृतः । तन्मात्रं स्रवते दंष्ट्राविषं सर्पस्य दारुणम् । ज्वालागते तु संपूर्णे देहे संक्रमते विषम् । यावत् संक्रामयेद्बाहुं कुञ्चितं वा प्रसारयेत् । अनेन क्षणमात्रेण विषं गच्छति मस्तके । एधते विषवेगस्तु शतशोऽथ सहस्रशः । वर्द्धते रन्ध्रमासाद्य ततो वाते शिखी यथा । तैलबिन्दुर्जलं प्राप्य यथा वेगेन वर्द्धते । शिखण्डी चाश्रयं प्राप्य मारुतेन समीरितः । ततस्तालाशतं प्राप्य त्वचास्थानं विचेष्टितम् । त्वचास्तु द्विगुणं विद्याच्छोणितेषु चतुर्गुणम् । पित्ते तु त्रिगुणं याति श्लेष्मे वै षोडशं भवेत् । वायौ त्रिंशद्गुणञ्चैव मज्जे षष्टिगुणं तथा । प्राणे चैकार्णवीभूते सर्वस्रोतो निरोधयेत् । कालदष्टा रुध्यमानेन याति साध्यमसाध्यताम् । ततोऽसौ म्रियते जन्तुर्निश्वासोच्छ्वासवर्जितः । निष्क्रान्ते तु ततो जीवे भूते पञ्चत्वमागते । तानि भूतानि गच्छन्ति यस्य यस्य यथालयम् । पृथिव्यापस्तथा तेजो वायुराकाशमेव च । इत्येषामेव संघातः शरीरमभिधीयते । पृथिवी पृथिवीं याति चापस्तोयेषु लीयते । तेजो गच्छति चादित्यं मारुतो मारुतं व्रजेत् । आकाशञ्चैव चाकाशे सह तेनैव गच्छति । स्वस्थानं ते प्रपद्यन्ते परस्परनियोजिताः । न जीवेदागतः कश्चिदिह जन्मनि सुव्रत ! । विषार्थं न उपेक्षेत त्वरितं तु चिकित्सयेत् । एकमस्ति विषं लोके द्वितीयञ्चोपपद्यते । यथा जलविषञ्चैव स्थावरन्तु तथैव च । प्रथमे विषवेगे तु रोमहर्षः प्रजायते । द्वितीये विषवेगे तु स्वेदो गात्रेषु जायते । तृतीये विषवेगे तु कम्पो गात्रेषु जायते । चतुर्थे विषवेगे तु श्रोत्रान्तरनिरोधकृत् । पञ्चमे विषवेगे तु हिक्का गात्रेषु जायते । षष्ठे तु विषवेगे तु ग्रीवाभङ्गस्तु जायते । सप्तमे विषवेगे तु प्राणेभ्यो विप्रमुच्यते । सप्तधातुवहा ह्येते वैनतेयेन भाषिताः । त्वचास्थाने विषप्राप्ते तस्य रूपाणि मे शृणु । अङ्गानि तिमिरायन्ते यतन्ते च मुहुर्मुहुः । एतानि यस्य चिह्नानि तस्य त्वचगतं विषम् । तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । अर्कमूलमपामार्गं प्रियङ्गुं तगरं तथा । एतद्वालोड्य दातव्यं ततः सम्पद्यते सुखम् ततस्त्विमॄ क्षते विप्र ! न निवर्त्तेत चेद्विषम् । त्वचःस्थानं ततो भित्त्वा रक्तस्थानं प्रधावति । विषे च रक्तसंप्राप्ते तस्य रूपाणि मे शृणु । दह्यते मुह्यते चैव शीतलं बहुमन्यते । एतानि यस्य रूपाणि तस्य रक्तं गतं विषम् । तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । उशीरं चन्दनं कुष्ठमुत्पलं तगरं तथा । कट्फलस्य मूलानि सिन्धुवारस्तगस्य च । हिङ्गुञ्च मरिचञ्चैव पूर्ववेगे तु दापयेत् । बृहती दृश्चिकाली च इन्द्रवारुणिमूलकम् । सर्पगन्धा घृतं चैव द्वितीये परिकीर्त्तितम् । सिन्धुवारं तथा हिङ्गु तृतीये कारयेद्बुधः । नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा । एतेनैवोपचारेण ततः सम्पद्यते सुखम् । रक्तस्थानं ततो गत्वा पित्तस्थानं प्रधावति । पित्तस्थानगते विप्र ! विषे रूपाणि मे शृणु । उत्तिष्ठते निपतते दह्यते मुह्यते तथा । गात्रतः पीतता स्याद्वै दिशः पश्यति पीतिकाः । धवलाश्च भवेन्मूर्च्छा न चात्मानं विजानते । विषक्रियां तस्य कुर्य्यात् यथा सम्पद्यते सुखम् । पिप्पलं मधुकं चैव मधुखण्डघृतं तथा । मधुसारमलाबुञ्च जातिशर्करवालुकाम् । इन्द्रवारुणिमूलञ्च गवां मूत्रेण पेषयेत् । नस्यं तस्य प्रयुञ्जीत पानमालेपमञ्जनम् । एतेनैवोपचारेण ततः सम्पद्यते सुखम् । पित्तस्थानमतिक्रम्य श्लेष्मस्थानञ्च गच्छति । श्लेष्मस्थाने ततः प्राप्ते तस्य रूपाणि मे शृणु । गात्राणि तस्य रुध्यन्ते निश्वासश्च न जायते । लाला च स्रवते तस्य कण्ठो घुरघुरायते । एतानि यस्य रूपाणि श्लेष्मस्थानगतं विषम् । तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । त्रिकटुकं कोशातकी लोध्रञ्च मधुसारकम् । एतेषां समभागानि गवां मूत्रेण पेषयेत् । नस्यं पानञ्च कुर्वीत अञ्जनं लेपनं तथा । एतेनैवोपचारेण ततः सम्पद्यते सुखम् । श्लेष्मस्थानमतिक्रम्य वायुस्थानञ्च गच्छति । तत्र रूपाणि वक्ष्यामि वायुस्थानगते विषे । आध्मायते च जठरं यत्नवांश्च न पश्यति । दृष्टेर्भं कुरुते रूपं दृष्टिभङ्गश्च जायते । एतानि यस्य रूपाणि तस्य वायुगतं विषम् । तस्यागदं प्रवक्ष्यामि येन सम्पद्यते सुखम् । शोणमूलं प्रियालञ्च रक्ता च गजपिप्पली । हिङ्गुञ्च पिष्ट्वा गुडिकाञ्च कुर्य्याद्दद्याच्च नस्याञ्जनलेपादीन् । एषोऽगदः सर्वविषाणि हन्यात् स्वयम्भुवा देववरेण सृष्टः । अञ्जनञ्चैव नस्यञ्च क्षिप्रं दद्याद्विषान्विते । वायुस्थानं ततो मुक्त्वा मज्जस्थानं प्रधावति । विषे मज्जगते विप्र ! तस्य रूपाणि मे शृणु । दृष्टिश्च हीयते तस्य भग्नमङ्गानि कुर्व्वति । एतानि यस्य रूपाणि तस्य मज्जगतं